॥ अथ हिरण्यकेशीन क्षत्रसत्र प्रयोगः प्रारंभः ॥

श्रीगणेशाय नमः ॥ ॐ नमः सिद्धं ॥ नत्वा श्रीसुमुखं देवं सत्याषाढं त्रिविक्रमं ॥ वक्ष्ये नक्षत्रसत्रस्य प्र
योगः श्रुतिसूत्रतः ॥१॥ तृतीयब्राह्मणे कांडे प्रपाठे प्रथमे श्रुताः । अनुवाके त्रिभिर्याज्यानुवाक्या
श्चादितो मताः ॥२॥ अनुवाके ततः सप्तत्रिंशदिष्टय ईरिताः । काम्यकांडे समाम्नानात्सर्वा
स्ताः काम्यसंज्ञकाः ॥३॥ छत्रिन्यायेन ते यागाः सर्वे नाक्षत्रसंज्ञकाः ॥ प्रायश्चित्ते समाम्नाताः सूत्रे
बोधायनीयके ॥४॥ एकैकस्मिन्ननुवाके प्रयोगस्त्वेक ईरितः ॥ ज्योतिष्टोमाप्तिरूपं तु तस्सुदायफ
लं श्रुतं ॥५॥ कृत्तिकादि भरण्यंतः प्रयोगस्त्वेक ईरितः ॥ अनूराधाद्यमावास्यापर्यंतस्त्वपरो म
तः ॥६॥ सेतश्चांद्रमसेष्ट्यादिर्वैशाखांतः परः श्रुतः । कृत्तिकादिर्वैशाखांतस्त्वेक एवेति कारिकाः ।
६ ॥७॥ अपमृत्युविनाशं च पापनिर्णाशनं फलं ॥ आयुष्कामः स्वनक्षत्रेष्वपरोध्यं यजेदिति ॥८॥
पुष्टिमंतावुपभागावग्निनारायणौ मतौ ॥ आयुष्मत्यां जीववंता या नो अग्न इति श्रुतेः ॥९॥ श्रीम
सोच तथा धात्र्यपरवारुहाद्राभ्य इत्यृचौ ॥ स्विष्टवत्यौ च संयाज्ये हव्यवाहमिती रितौ ॥१०॥ अग्निश्चा १
नुमतिश्चाशाल्से सर्वत्र देवते ॥ वैशाखिकालयोर्मध्ये नक्षत्र सहदेवता ॥११॥ अग्न्यादियमपर्यं

ताः प्रोक्ता नक्षत्रदेवताः ॥ अष्टाविंशतिसंख्याकाः प्रोक्ताश्चाभिजिता सह ॥ १२ ॥ सप्तचांद्रमसाद्याश्च वैष्ण
वांताः पृथक्श्रुताः ॥ पौर्णमासीत्वमावास्या हे समविंशद्विद्वयः ॥ १३ ॥ अषाढाश्रोणयोर्मध्ये त्वभिजित्कृ
त्त ईरितः ॥ उत्तराषाढतुर्यांशो यामार्धं श्रुतेर्मुखे ॥ १४ ॥ संधिरूपोऽभिजित्काले योगादौ ज्योतिषि स्मृतः ॥
ग्रहविष्कंभिरूपस्तु याग एकोनविंशमतः ॥ १५ ॥ अरण्यं तेत्वमावास्या विशाखांते च पौर्णिमा ॥ यागद्वयं तु व
चनादृष्टांते तथाभिजित् ॥ १६ ॥ एकस्मिन्नह्नि संप्राप्ते प्रकृतिर्विकृतिर्यदि ॥ इष्ट्वादौ प्रकृतिं पश्चात्तस्मात्तां वि
कृतिमारभेत् ॥ १७ ॥ पौर्णमासीत्वमावास्या सविता च प्रजापतिः ॥ तथा भूमिकपालो हि बुध्न्यश्चोपांशु
देवताः ॥ १८ ॥ वसवः पितरः सर्पा ऐंद्राग्नस्त्वेंद्र एव च ॥ प्रोक्ता ऐंद्राग्नसंज्ञाश्चाग्नीषोमीयाऽथोच्यते ॥ विश्वे
देवाश्च सोमश्चाहोरात्रे अश्विनौ तथा ॥ अग्नीषोमप्रधाने तु तंत्रं स्यात्पौर्णमासिकं ॥ २० ॥ तथैंद्राग्नप्र
धाने तु श्चामावास्यं समीरितं ॥ केवलाग्नेयतंत्रे तु विकल्पेन व्यवस्थितिः ॥ २१ ॥ शुक्ले तंत्रं पौर्णमासं कृ
ष्णेमावास्यमीरितं ॥ पंचम्यंतः पूर्वपक्षश्चाष्टम्यंतस्तथापरे ॥ २२ ॥ नक्षत्रह्रासवृद्धौ तु ह्रासे यागद्वयं
मतं ॥ तथा नक्षत्रवृद्धौ तु विरामस्त्विति निर्णयः ॥ २३ ॥ देवतायाः प्रधानत्वं नक्षत्रस्येति केचन ॥

नक्षत्र प्रधानमुभयोस्तत्र्यदेवते निश्चितेर्मतं ॥२४॥ यागकालमभिव्याप्य पूर्वाह्णे चोदयेन्न यत् ॥ नक्षत्रं तत्तया सत्र
२ गीयं तारतम्येन निर्मितं ॥२५॥ पुंनक्षत्राणि चैतानि पुष्यो हस्तः पुनर्वसुः । अभिजिच्छ्रोणपाद्येव अ
नूराधाश्विपुरूथा ॥२६॥ नपुंसकं शतभिषग्मृगशीर्षं च मूलकं ॥ पुनर्वसू विशाखे वाश्वयुक्च तु
द्विदैवतं ॥२७॥ या एकधचनोलास्ताः सर्वा आग्नेयसंज्ञकाः ॥ अस्मिन्सत्रे परे पक्षे ग्लौलिंगे प्रियमस
स्मके ॥२८॥ अयने दक्षिणे रात्रौ संध्यायु षसि चोदये ॥ संपूर्णफलसिध्यर्थं यष्टमिच्छंति याज्ञिकाः ।
॥२९॥ पत्न्यनालंभुका स्याच्चेद्यपरुध्य यजेदिति ॥ सद्यस्कालेष्वयः सर्वाः स्त्रोस्त्राश्चक्तस्य हसाध्यता ३०
च ऋत्विजां यजमानस्य रुध्यादिषु निमित्तके ॥ नयागस्य विरामो स्ति चान्यैर्वा याजयेदिति ॥३१॥ आ
रब्धे सत्रिसत्रे ते मध्ये वा गुरुभुक्तयोः ॥ मोढ्ये धिके क्षये प्रामेन दोषइति माधवः ॥३२॥ अथाध्याता
नसंज्ञाश्चमोकारा भृतस्तथा ॥ पुराश्चिष्टकृतो कुत्वा निसहोमादनंतरं ॥३३॥ आशुग्रीहि त्मह
ब्रीहिशुक्लकृष्णांस्तथेतरान् ॥ यवान्श्यामाकनीवारान्प्रियंगू श्वसमिकुभान्न् ॥३४॥ शुक्ल २
लेतथा गावो सवा स्यो गृष्टि संयुतो ॥ अभिवान्याच गांशारवांगो घृतं चोपकल्पयेत् ॥ ३५ ॥

श्रीफलं तंडुलान्मूगान्खिजो पद्म भूर्वरान्॥ कृत्वा पूजनसंभारान्क्रतुसंकल्पमारभेत्॥ ३६॥ अथ बोधायनसूत्रं॥ अथ नक्षत्रेष्टिं
व्याख्यास्यामो ऽग्निर्वा अकामयत अन्नादो देवानां स्यामिति ब्राह्मणे व्याख्याताः सा या वैशाख्याः पौर्णमास्याः पुरस्तादमावास्या भ
वति सा सकृत्संवत्सरस्याप भरणीभिः संपद्यते तस्यामारंभो नो तिष्ठेतस्या उपवसथे ऽरण्योरग्नी समारोप्योदवसायमथित्वाग्नी
न्विहृत्या न स्नो … पि वा पौर्णमासीममावास्यां वोपवसेद्यत्र तल्लक्ष्म संपद्यते तत्रेत्येतेनः प्रदेशो ऽहविरुद्धश्च प्रसंगो भवतीति विज्ञा
यते ऽपि वा जन्मनक्षत्रे कुर्यादायुष्कामस्य व्यवराध्ये प्रयोगो जीववंता वाज्यभागौ यज्ञस्यानो अग्ने सुकेतुना त्वं सोम महे भगमि
ति। अथ निर्वपत्यग्नये कृत्तिकाभ्यो जुष्टं निर्वपामीत्यग्निं कृत्तिकाश्चेति संप्रेष्यत्याग्नेयमष्टाकपालमनुमत्यै च चरुं सर्वत्रानुष
जति नक्षत्रहविर्मध्ये ऽपप्रथित्वा सादयति तस्याः समृद्धा सामिधेन्याः समिध्यमानां च सामिद्धवती चांतरेणाग्नी मत्यो धाय्ये दधाति
स्वा रुहाय० था। अग्ने० नतो ३ महा० षाणां। नू० नवो ३ रयिमं तपुष्ट्मंता वाज्यभागौ यजत्याग्निनारयिमश्नवद्धृयस्फानो अमीव
हेस्य थहे विषोऽग्निर्मूर्धा भुवो अनु नो ऽद्यानुमतिरन्विदनुमतेत मिति संचरपोर्याज्यानुवाक्ये नक्षत्रहविषोऽग्निर्नः पातु कृत्तिका इति
यथा समाम्नातमथ पुरस्तात्स्विष्टकृतः स्रुवाहुती रूप जुहोत्यग्नये स्वाहा कृत्तिकाभ्यः स्वाहेति यथासमातः
स्विष्टकृतः संयाज्ये हव्यवाहं स्विष्टमिति संस्थिते तदेषु हिः सप्तर्णी पात्रं धृष्णुकमा निस्तेभ्रनमेवं भातिमंत्रे
उच्चैर्ये ग्रहेन। हविः शेषान्व्याख्यास्यामः प्रजापतिः सवितेत्युपांशु सर्पेभ्य आश्लेषाभ्य आ ज्येकरंभामि
ति सर्वे वायवा भवंति सधिश्रयया काले तिरः पवित्रमा ज्यमानीय तिरः पवित्रं करंभानावयति पितृभ्यो मघा
भ्यः सनक्षत्रभाष्ये उक्तं॥ पूर्वदिनएव भरण्युत्तरं समारोपादिसर्वं भवति। चतुर्दश्यां तिथिक्षिपालसंक्रांत्यादिदोषे तु पूर्वदिने औपवसथ्यं कृत्वा ऽन्यारंभयादिस
[illegible] एवं पर्यापि दोषाक्रांतं त्ये स्नातिपदिकर्म कारुप्यापि कृत्तिका नक्षत्रमसलेष [illegible] के तीष्टेरनंतरं समारोपादिसर्वं कृत्वानंतरं प्रथमे
रारभे [illegible]

हि॰ न॰ भ्यः पुरोडाशं षट्कपालमिति पैतृयज्ञेन निर्वपणप्रोक्षणाधिवपनसंवपनानि व्याख्यातानि भवंति तानीह सत्र
सवनीयके न सौम्येन प्रचरणं व्याख्यातोथेन्द्रायवेनिष्ठायै गृष्ट्यै दुग्धमिति पयः प्रातर्दोहवत्संस्कारश्चा
२ विरुद्धार्थत्वाभिष्ठा तदानीमेव पौर्णमासीमाज्येन यजेताथश्वोभूते मित्राया नूराधेभ्यश्चरुमित्युत्तराषाढा
भिष्ठा तदानीमेवाभिजितं यजेतोत्तरेषु प्रोष्ठपदेषु पुरोडाशं भूमिकपालमिति भूकपालं भूमौ परिलिख्या
गारान् निर्वर्तयितित स्यैककपालस्यैव संस्कार आपभरणीभिष्ठा तदानीमेवामावास्यामाज्येन यजेताथश्वो
भूते चंद्रमसे प्रसीदृश्यायै पुरोडाशं पंचदशकपालमित्यभिनीयैवाहनि निर्वपेदुदिते चंद्रमसि प्रचरेदथैन
दहोरात्राभ्यां चरुं निर्वपेद्यानां व्रीहीणां शुक्लानां कृष्णानां च संवालोडुः धेष्येतायै चरुष्णायै चैत
भिनीयैवाहनि निर्वपेदस्तमिते प्रचरेदपि वा संधावेव निर्वपेत्संधावेव प्रचरेन्निर्वपणन्यायेन प्रचरेद
थैतमुषसे चरुमित्यभिनीयैव रात्रौ निर्वपेदुषसि प्रचरेदथैतस्मै नक्षत्राय चरुं निर्वपति यथाहमस्ये
यमहं मनुष्याणां भूयासमिति निर्वपणकाले यजमानायतनं आसीनो यजमानो जपत्यभिनीयैवा ३
हनि निर्वपेदुदिते पुनर्नक्षत्रेषु प्रचरेदथैनं सूर्याय नक्षत्रेभ्यश्च चरुमित्यभिनीयैव रात्रौ निर्वपेदुदि

तं प्रथमभीणस्य नक्षत्रचक्राधारभूताः सूर्यादयो ग्रहा अप्रदक्षिणं सरन्त गतिप्रमाणेन गच्छंति । तत्र ध्रुवो ग्रहा भिन्नः सोमस्य सनक्षत्रा स्वेहोत

[illegible] रेकः पर्यायः [illegible] पागः । [illegible] सत्रमा

मे प्रचरेदथैतस्मादिष्येन्चरुमित्यथैतु दक्षिणा वचरुमिति यज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रतितिष्ठतीति ब्राह्मणं व

रो दक्षिणा भवतीति विज्ञायते पशुप्रसिद्धपाथिकृत्स्येष्ट्वा दर्शपूर्णमासाभ्यां यजेत नक्षत्रसत्रेण ज्योति

रानं स्याय ज्योतिषामयनेनेष्ट्वा पापं निर्णुद्य ज्योतिष्ट्वमुपपद्यते पुनर्मृत्युं जयतीति ह स्माह बौधायनः ॥

इति खंडद्वयात्मकं बोधायनसूत्रं ॥ ॥ तस्यार्थः ॥ नक्षत्रसत्रमित्येकं समुदायकर्मणो नामधेयं ॥ ज्योति

षामयनमित्यपरं ॥ फलं तु पापनिवृत्ति पूर्वकं अपमृत्यु विनाशरूपं ज्योतिष्ट्वप्राप्ति रूपं च समुदायफलं ॥ ब्राह्म

णे तु अन्नादकामः प्रजाकामः पशुकाम इत्याद्येकैकस्य यागस्यैकं पृथक् पृथगाम्नातं फलं ॥ निष्कामपक्षे ॥ वि

ष्णुप्रीतिमात्रोद्देशफलमित्यपि दर्शितं ॥ स्वसूत्रे तु ॥ यथारूपमितरे ॥ इति परिभाषासूत्रे ज्ञापकत्वान्न सूत्रका

मंत्र रैः पृथक्सूत्रितं ॥ यदनुक्तं ब्राह्मणेन तत्प्रसिद्धं ॥ इति काठकसूत्रे आम्नानात् । ब्राह्मणे तृतीयकांडे प्रथमप्र

पाठके स्पष्टत्वेनाम्नानाच्च । आचार्यैर्न स्पष्टत्वेनोदाहृतं ॥ अत्र नक्षत्रशब्दः कालावयववाचीति श्रूयते ॥ स

मानस्याह्नः पंचपुण्यानि नक्षत्राणि । चत्वार्यश्लीलानीत्यर्थवादश्रवणात् । नक्षत्रस्वरूपं तु । सलिलं वा इ

दमंतरासीत् । यदतरन् । तत्तारकाणां तारकत्वं । यो वा इह यजते । अमुं स लोकं नक्षते । तन्नक्षत्राणां नक्ष

त्रत्वमित्यर्थवादात् । सुकृतां वा एतानि ज्योतींषि । यन्नक्षत्राणि । तान्येवाप्नोतीति । अग्निकांडे श्रवणात् ॥

गकृत्तु [illegible] भाविनाशरूपफलं समुदायफलं । तानि नक्षत्राणि ज्योतींषि [illegible] अश्विन्यादि [illegible] रेवत्यंतानि दर्शितानि ॥ ब्रा

ह्मणे तु । कृत्तिकाद्यपभरण्यंतानीष्टकारूपाण्याम्नातानि अत्र तु । कृत्तिकाद्यभिजितांतान्यपभरण्यंतान्यपराणि

यागरूपाण्याम्नातानि [illegible] कालसाध्यत्वात् अत्र सत्रमिति संज्ञा । नाग्न्यः सत्रे प्रतिगृह्णातीति प्रतिग्रहनिषेधः । असोमिकत्वात् अग्निः सत्रा

यां कोटिहूयमाम्नातं। कृत्तिकाः प्र॰ देवनक्षत्राणि। अनू॰ यमनक्षत्राणि। तत्संबंध्यमुशास्थाये थिमा चांद्रमसाश्चावैष्णवा तान्त्र्य सर्या
गीयदेवताः। तासां क्रमेण पूर्वपक्षे परपक्षे वियागः श्वाचनिकृत्वा नीत्रापरपक्षेयाग निषेधः। अग्निरवमो देवतानां विष्णुः परमः इत्यग्निक उत्सव
णालस्अग्नेर्विष्णोश्च आद्योत्तमत्वं माम्नातं॥ तथात्रापि। कृत्तिकानक्षत्रस्याग्निअग्ने दैवताकत्वं। अंते पिवेष्णा
वी श्चावि ष्णुदेवत्ताविधानादाद्योत्तमत्वं सूचितं। अत्र देवता प्रधानं न क्षत्रप्रधानं उभय प्रधानं वाम्नाद्यं।
भुक्ताश्च यंमस्यादेवतां प्रधानमेव याज्ञिकाआमनंति पत्न्यामनाकुंभुकायां मध्येचेदपरुध्य यागः। सत्र
मध्यवर्तियागावत्तिपनधर्मे यां नौकार्याविति बौधायन सूत्रकारस्याशयः। याज्ञिकास्तु आयक्षित भ
यात्मध्ये सत्रस्यतत्तत्काले एवानुष्ठितुमिच्छंति। ते रेवार्त्विग्भिः अन्यैर्वा कार्यः। प्रकृतिकूला विकृतिंच
रेत्। मध्ये वृध्यादिनिमित्ते सति नानुष्ठान विरामः। अन्यर्त्विग्भिर्वा यजेदूरति॥ अत्रोपहोमकाले गृह
शाण प्रपाठकमंत्राणां विनियोगाभावाद्वनालिंगादिविनियोगः कार्यः। इति भरद्वाज सूत्रकारे रुक्त
हूलं। अथतस्य कालः। चैत्र्याममावास्यायां कार्त्तिक्यां पौर्णमास्यां यजनीयेवा कृत्तिका योगआरंभः
अन्यत्रवा उदगयनआपूर्यमाणपक्षेवा प्रयोग मिच्छंति। उदवसानं वैकल्पिकं। पूर्वोक्तान्संभारानुप
कल्प्य। ऋत्विजआहूय॥ ॥अथतस्यप्रयोगक्रमः॥ भरण्यां पूर्वेद्युर्नांदीश्राद्धं उदकशांतिप्रति ४
सरबंधंच कर्मणः सांगुण्यार्थं अंकुरारोपणंच विधाय। दंपती अलंकृतौ शुक्लवाससौ अपरेणगा
र्हपत्यं दर्भेष्वासीनः इतोदिषियज्ञशरूजानांदीश्रद्देवताप्रजननपूर्वकं देराकालादिस्मृत्वा अपमृत्यु वि

६

मात्रा पूर्वकपाप निवृत्तिद्वाराश्रा। विष्णुप्रीतिकामो ज्योतिष्ट्व प्राप्तिकामो वा नक्षत्रसत्रेण ज्योतिषामय
नेनयक्ष्ये। तेनयज्ञनारायणं प्रीणयानि। अग्निकृत्तिकादयः प्रीयंतामिति विशेषः॥ अस्मिन्नक्ष
त्रसत्रे ज्योतिषामयनेऽध्वर्युं त्वामहं वृणे। इत्यादि प्राक्सामान्याश्च स दृश्यादीन्यथा संभवं वृत्वा ह
यित्वा॥ स्वनक्षत्रे आयुष्कामप्रयोगपक्षे आयुष्काम स्वजन्मनक्षत्रे व्यापक्ष्ये। इति विशेषः। न स्यजा
तु मतो धाज्यभागौ अलिप्वरणादि पूर्ववत्। उदवसानपक्षे पृथगरण्योरग्निसमारोपणं। अयंते
इत्यादि आत्मसमारोपणं वा। उपावरोहेति। प्रत्यक्षाग्न्यानीत्वा मंथनादिना ग्निं प्रज्वाल्य विहारं कल्प
यित्वा ग्नीन्पृथक्पृथक् परिस्तीर्य परिषिच्य गार्हपत्य आज्यं संस्कृत्य। करिष्यमाणेन नक्षत्रसत्रा
गभूतं कृत्स्नोऽहं होष्यामि। इत्याद्युपस्थानवरदानांतं। अत्र प्रणयनपक्षे सर्वार्थमेकं प्रणयनमिति
केचित्। पृथगेवेति शिष्टाः। अत्रान्वारंभणीयां केचन नेच्छंति। दर्शपूर्णमासे कृतका। इत्यानष्य वक्ष
यो बाः। अन्वारंभणीयाकरणपक्षे चतुर्होतारं कुर्यादन्वारंभणीयां कुर्यात्। नक्षत्रसत्रेण यक्ष्यमाणश्चतु च
र्होतारं संग्रह होष्यामि। पृथिवी० वाचस्पते० द्वियाय स्वाहा। चतुर्गृहीतं दर्विहोमधर्मेण जुहोति॥

स० वाचस्पतये चतुर्होत्रे अन्नलुण ३० । पुनर्विहृत्य । श्री० नक्षत्रसत्त्रेण यक्ष्यमाणोऽन्वारंभणीयेष्ट्या यक्ष्ये । ममा०
अ घयग्राय० इमाम्‌जेयथातिथिं अन्वारंभणीयं हविः ० पौर्णमासं तंत्रं । आग्नावैष्णवमेकादशकपालं १
सरस्वत्यै चरुं २ सरस्वते द्वादशकपालं ३ अग्नये भगिनेऽष्टाकपालं ४ अग्निर्भगी तु येके स्विकः । पात्रासा
दने । स्फ्यमनसहे कत्रिंशत्कपालानि । स्थाली मेक्षणं च । अन्वाहार्यस्थाली वर्जमितराणि प्रकृतिव
त् । निर्वापे देव० मग्नाविष्णुभ्यां जुष्टं नि० १ सरस्वत्यै जु० २ चर्वर्थाच २ सरस्वते जु० ३ अग्नये भगिने जु० ४
द्वितीयश्चरुः अन्ये पुरोडाशाः । आद्यो ग्नीषोमीयः । अन्ये आग्नेयविकाराः । प्रोक्षणे । देव० भ्यां स
रस्वत्यै सरस्वतेऽग्नये भगिने वो जुष्टं प्रोक्षाम्यग्नाविष्णुभ्यां । प्रागधिवपनात्स्वरू पुरोडाशीयविभागः । क
पालोपधाने । आद्यस्याग्नीषोमीयवत् । एकादश कपालानि । सरस्वत्यै स्थाली सरस्वते द्वादशकपा
लानि । आग्नेयवत् । पंच पञ्च त्रिंदसि । ततोऽग्नये भगिनेऽष्टाकपालानि । ततउभयोः संवापादि पिंड ५
विभागादि । आद्यं पिंडमधिश्रित्य । घर्मोऽसि इति तंडुलानुप्त नः घर्मोसीत्यादि प्रथनादि न चरौ ॥

अविदहंतइत्यादि। आघेतूष्णीमभिघारणं। मंत्रेणेतरेषु। आसीदंत्विति प्रासादनं। यज्ञास्तु स० पंता॰ भ०
ती॥ उत्तरेषां। प्रजाप० प्रथमस्य। अयं यज्ञो विहव्यं चतुर्होता। प्रधाने। अग्नाविष्णुभ्यां म०। अग्नाविष्णू य
ज। अग्नाविष्णुभ्यामिदं०। अग्नाविष्णेवारहं देवं० वृत्रहाभू०। सरस्वत्या अ०। मे क्षेणावदानं। सरस्वती
यज। सरस्वत्या इदं। सरस्वत्योऽहं० या वाचमन्नाद्यं पुषेयं। अस्मात्क्षात्मात्। सरस्वतेनु ब्रू० सरस्वंतं यज।
सरस्वत इदं० सरस्वतो हं दे० पान्नादो०। अग्नये भगिनेनु० अग्निं भगिनं यज। अग्नये भगिन इदं० अग्नेर्भगिनोऽहं दे०
न्नादः। पुरस्तात्स्विष्टकृतः चित्तं चेत्यादि जयान्दर्विहोमधर्मेण जुहोति। स्विष्टकृति मेक्षणप्रहरणं। विकल्प्य
प्राशित्रं। उत्तरेषां चतुर्धाकरणं। मिथुनौ गावौ दक्षिणा। ब्रह्मा। ब्रह्मणो ब्रह्मणो [illegible] ब्रह्मणेवा [illegible] हुताये० स्विष्ट
म० क्षेम० शिवे भवतं। प्रजापते रिष्टविकृतं। यज०। इमौ मिथुनौ गावौ वामृ० पूर्वा० रेउ [illegible] अ० णे। तेदक्षिणतुः ए०
ताभ्यां मिथुनाभ्यां गोभ्याम० स्तुं। प्रजा० के। इमौ मिथुनौ गावौ अहिं० सं० ध्वं। ऋत्विजः देव० णे रुद्राय गावौ ताभ्यां०
लु। बर्हिषा प्रतीयाज्ञां वाश्ववा। प्रथमस्य हविःशेषः चत्वारः पत्नीसंयाजाः। नपार्वणः कपालानि विमुच्य। यां
धर्मइतिस्त्रुतालौ विमोकः। पुनरालंभ पत्नशां च वर्जं ब्राह्मणतर्पणांता। संस्रवलेन्नारंभणीया॥ ॥अथकृ
त्तिकानक्षत्रेष्टिः॥ ॥तस्मिन्नेवाहनि श्चीवा नक्षत्रताराग्न्यानुसारेण प्रयोगः। अथ यज्ञमाये हि कालप्रप्री

६ न.स. स्कृत्तिकानक्षत्रपासेप्रकृतिविकृत्योस्तंत्रेणप्रयोगं केचिदिच्छंति। तत्र सूत्रास्वारस्यं। दर्शपूर्णमासयोर्विकृतेश्च
६ संनिपाते दर्शपूर्णमासौ बलीयांसौ। इति परिभाषाया माचार्यवचनात् प्रकृतिं कृत्वा विकृतिं चरेत्॥ ॥अथान्वारंभणी
याप्रकृतेर्होत्रं॥ ॥देवा यो इत्यादि पंचदश सामिधेन्यः। आवाहने। अग्निम्० सोमम्० अग्नाविष्णू आ० सरस्वतीमा०
सरस्वंतमा० अग्निंभगिनमा० देवां आज्यपां इत्यादि। उत्तमे प्रयाजे। ये ३ हे भू० र्ग्निः स्वाहा सोमं२० हाग्नाविष्णू० स
रस्वती२० सरस्वंतं२० ग्निंभगिनं२ स्वा० देवां इत्यादि। पार्वणावाज्यभागौ। अग्नाविष्णू महि तं० नाम। इमे द० माचरैष्या।
ये ३ हे ग्नाविष्णू अग्नाविष्णू म० मुचरण्य ३ छौ० प्रणो देवी सर० सो ३। ये ३ हे सरस्वती भू० रा नो दि० णो नु ३ वौ०॥
पीपिवां२ स२ स० बो ३॥ ये ३ सरस्वंतं भू० यैते स० हा ३ ३ वौ०॥ आसव२ स० सो ३। ये ३ ग्निंभगिनं भू० र्कुवेवानं० सां ३
नित्यस्विष्टकृत्। ये ३ हे ग्निः स्विष्टकृतं भू० ढग्निरग्नेः प्रि० सोमस्य० ढग्नाविष्ण्वोः प्रि० सरस्वत्याः प्रि० सरस्वतः०
उग्नेर्भगिनः प्रि० हविरग्ने० धा ३ वौ०॥ सूक्तवाके। अग्निरि० सोम इ० अग्नाविष्णू इ० वे० कातां। सरस्वतीदं० सर
स्वानिदं० अग्निर्भगीदं२० देवा इत्यादि॥ ॥संतिष्ठते न्वारंभणीया होत्रं॥ ॥अथ केवलकृत्तिकानक्षत्रेष्टि
प्रयोगः॥ श्री० थ अन्नादकामः आग्निर्देवता यास्सहकृत्तिका नक्षत्रेष्ट्या यक्ष्ये। अवांतरफलका क्षायां समानो ६
नामध्ये अन्नादः स्यामिति संकल्पः। पृथग्वरणपक्षे। अस्यां कृत्तिकानक्षत्रेष्ट्यां अध्वर्युं त्वाम हं वृणे। एवं स

वैचप्रयोगः। सर्वासां सद्यस्कालप्रयोगः। ममाग्ने॰ अध्यक्षाय॰ इमामूर्जं पथा तिथि॰ ऐष्टः हविः॰ पौर्णमासं तन्त्रं॰ बर्हिषा व्रतं। त्रयोविंशतिधेत्यूहः। पात्रासादने। कृत्तिकाशब्द आकारान्तः स्त्रीलिंगो बहुवचनान्तः। अष्टौ कपालानि स्थालीमेक्षणं चेति। मध्ये संचरदेवतोयाः अष्टौ स्थालीं कपालानि वेत्यिव्यवस्था। अन्वाहार्यस्थालीवर्जमन्यानि प्रकृतिवत्। निर्वापे। यज्ञं॰ देव॰ मग्नयेजु॰। अग्नये कृत्तिकाभ्योजु॰। पुरोडाशीयान्। अनुमत्येजु॰ चरव्यान्। अग्नेर्हव्यं रक्षस्व। अग्ने कृत्तिका॰ अनुमते ह॰। प्रोक्षणे। देवस्य॰ भ्याम् अग्नये अग्नये कृत्तिकाभ्योनुमत्यैवो॰ प्रोक्षामि। शुधध्वमित्यादि निनयनान्ते भागधिवपना न्। यथाभागं व्या॰ र्ध्वे। विवेकेन विभज्य। स्थूलराशेः। इदमग्नये अग्नये कृत्तिका॰ अवशिष्टे। इदमनुमत्यै च। पूर्वोपिन ष्टि। मदन्त्यधिश्रयणादि। कपालोपधाने। आग्नेयस्याष्टौ कपालानि प्रकृतिवदुपधाय। तदुत्तरतस्तथैवाग्नये कृत्ति काभ्यः स्थावुपधाय। तदुत्तरतः प्रणीतोदकसहितां। ध्रुवासि॰ ह। स्थालीमुपधाय। तप्त्वा स्थालीं संवापादि। उभयोः उत्सवनं च। हवींषि इति तण्डुलानुत्सुनाति। समावहत्वा दि। यथाभा॰ धां। इदमग्नये। इदमग्नये कृत्तिभ्यः। धर्मोसि। पुरो डाशावधिश्रित्य। घर्मोसि इति स्थालीं तण्डुलानो प्य। उरुप्र॰ पुरोडाशयोः। तं च गृह्णी॰ अंतरि॰। सर्वेषां। देवस्त्वा॰ पुरोडाशयोः। अग्निस्ते॰। सर्वेषां। सं ब्रह्म॰। पुरोडाशयोः। अविदहन्त। सर्वेषां। प्रयत्नपरिमार्जना। भिज्वलनभस्मा ध्यूहनानि च रौ। अविदहन्त स्थाली उद्वासने। इदमहमिति पुरोडाशयोः। सूर्यज्यो॰। सर्वेषां। स्योनं ते॰। सुसेवां शयोः। अभिघारणे। प्रकृतिवदाग्नेये। आप्याय॰ साग्नये कृत्तिभ्यो जु॰ भि। तेजनुमत्यैजु॰। आर्द्रः॰। पुरोडाशावुद्वा

नक्ष० स्य॥आर्द्रीभुवनस्येति रुद्रात्यासहच रुद्रदास्य। नतस्मीन्सीदिति चरोः॥दशाभ्र० कपालान्पुदास्य॥देवस्त्वासवितो० सत्रे
७ फु।अलंकरणं सर्वेषां।आग्नेयविकारत्वान्न छीमासादनं।यज० यज्ञास्व० ताःस० यंताः० तीः।अयं यज्ञः० वि
हव्यं पंचहोता।।अयं वेद इत्यादि॥भीम स्तोधाप्ये।पुष्टिमंतावाज्यभागौ।प्रधाने।अग्निःप्रकृतिवत्।आयश्नि
नम्प्रयोगे।प्रधानमुपांशु॥अग्नये कृत्तिकाभ्योनुब्रूहि।अग्निं कृत्तिकायज।अग्नये कृत्तिकाभ्य इ०अग्नेः कृ
त्तिकानाम०नादोभ्र्यासं।अनुमत्या अनु ब्रू०अनुमतिं यज।मेक्षणे नचरोः।अनुमत्या इ०अनुमत्याज०
न्नादः०नपार्वणः।पुरस्तात्स्विष्टकृत उपहोमाः।दर्विहोमधर्मेण।अग्नये स्वाहा।कृत्तिकाभ्यः स्वा०अंबायै स्वा०
३दुलायै ४नितत्न्यै०५अभ्रयंत्यै०६मेघयंत्यै०७वर्षयंत्यै०८चुपुणीकायै०९यथालिंगं त्यागः।जयाभ्यातानोराष्ट्रभृ
द्धोमान्वा कृत्वा।ततः स्विष्टकृदादि मेक्षणे नप्रहृत्य।वैश्वानर इत्यादि विरूज्यसंशीतं।इडादि सर्वेषां चतुर्धाकरणं।
नहविःशेषः।दक्षिणा दाने।सर्वा स्विष्टि सुगोदक्षिणा।ब्रह्मा।ब्रह्मणि ब्रह्मण्य० यामा० शिवाभव।प्रजाप० स्त्वजस्व
तीपयस्वती० के।यज० इयं गौर० माणा।सारा० नयागवा० सु।प्रजा० के।इयं गौरहिं० संनो० धं।देवस्य० रुद्राय गां त
या० तु।बर्हिर्धामती आह्वांवाभ्वंवा।ब्रह्मन्प्रस्थास्यामइत्यादि।उज्जितिवाचने।अग्नेर० स्तो० अग्नेः कृत्तिकानाम
हस्तु० अनुमत्या अहस्तु० देवानामित्यादि।चत्वारः पत्नीसंयाजाः।कपालविमोचने।यो धर्मे० न्वंमि० तां।इतिस्था

नपार्वणः

लीविमोकः॥ ॥आत्मणतर्पणांतंसमानं॥ अथहौत्रं।देवायोइत्यादि।सप्तदशसाभिधेन्यः सर्वास्विष्टिषु इदमह
ऽं सप्तदशेन वज्रेणद्विषंतं· द्विषः।इतिसर्वत्रोहः।श्रीमत्यौधाय्ये।शोचिष्केशस्तमीमहे३ ऽं स्वारुहायस्यश्रियोदृशे
रयिवऽरपतोयथा॥ अयंयज्ञस्यचेतनो३ मदाभ्यःपुरएताग्निर्विशांमानुषीणां॥ तूर्णीरथःसदानवो३ ऽं समिधश्च
स्यादि॥आवाहने।अग्निम·ह।सोम·ह।अग्निमा·हअग्निंकृत्तिकाआ३ अनुमतिमा३ देवाऽंइत्यादि।अग्निर
नुमतिश्चायोतमग्निस्येसर्वत्र।मध्येविशेषदेवता।उत्तमेप्रयाजे।ये३·भू·स्वाहाग्निऽं·सोमऽं·ग्निऽं·ग्निंकृत्तिका
नुमतिऽंदेवाऽंइत्यादि॥पुष्टिमंतावाज्यभागौ॥अग्निनारयि·तमो३।ये३·ग्निंभू·जुषौअग्नि·वौ३·।गयस्फानोअ·
भवो३।ये३·सोमंभू·जु·सोमआ·वौ३·।प्रधाने।अग्निःप्रकृतिवत्॥अग्निर्नःपातुकृत्तिकानक्षत्रंदेवमिंद्रियं॥इदमा
सांविचक्षणऽंहविरासंजुहोतनो३।ये३·ग्निंकृत्तिकाभू·यस्यभांतिरश्मयोयस्यकेतवोयस्येमाविश्वाभुवनानिसर्वा॥स
कृत्तिकाभिरभिसंवसानोग्निर्नोदेवःसुवितेदधातु३वौ३·अनुनोद्यानु·तांदाभ्युपोमयो३।ये३·नुमतिंभू·रन्वि
दनुम·नःकृधि।क्रत्वे·षा२वौ३·।स्विष्टकृतोसंयाज्ये।हव्यवाह·वेमो३।ये३·ग्निऽंस्वि·भू·ऽग्निर·सोमस्य·ऽग्नेः
प्रि·ऽग्नेःकृत्तिकानांप्रि·ऽनुमत्याःप्रिया·देवा·हविःस्विष्टमग्नेअभि·ष्या।उरुन्नःपंथांप्रदिशन्वि·आयू३र्वौ३०॥

इडोपाह्वाने॥ इडोपहूतोपहूतेडोपो० मिडोपहूतोपहूतेड० मानवी स्यादि पूर्ववत्॥ सूक्तवाके॥ अग्निरि० रुत॥ सोम० रु स्त्रे
त॥ अग्निरि० रुत॥ अग्निः कृत्तिका इदं० रुत॥ अनुमतिरि० रुत॥ देवा आ० केत॥ इत्यादि समानं॥ आयुष्कामस्य स्वन
क्षत्रे प्रवराध्यंप्रयोगेतु॥ जीवातुमंतावाज्यभागौ॥ आनो अग्ने सुके० जीवसो भ०॥ त्वं सोम महे भ० वसो भू०॥ नित्येया
ज्ये॥ धाय्ये संयाज्ये इत्यादि पूर्ववत्॥ आसत्र समाप्तेः पत्नीयजमानौ ब्रह्मचारिणौ॥ अधःशायिनौ ब्रह्मचारिणौ हविष्या
शिनौ भवतः॥ यजमानो हविरुच्छिष्टं वाश्नीयात्॥ संतिष्ठते कृत्तिकानक्षत्रेष्टिः॥ १॥ अथ रोहिण्यां रोहिणीनक्षत्रेष्टिः॥
अत्र सर्वत्र संचरयो विशेष एव वक्ष्यते॥ धाय्ये आज्यभागौ संयाज्ये इत्यादि पूर्ववत्॥ श्रीप० प्रजापतिर्नोस्तु रोहिणीन
क्षत्रे स्या यस्ये॥ समानानां प्रियम वाप धान्॥ इत्ययं तरसं कल्प्यः॥ ममाग्ने० ए इदं० त्रयो विं० शतिर्ये स्यादि सर्वत्र॥
पात्रासादने॥ अष्टौ कपालानि स्थाली इत्यंभे क्षणे॥ इति विशेषः॥ निर्वापे॥ आग्नेया नंतरं॥ देव० प्रजापतये रोहिण्ये जु
निर्वपामि चरु व्याप्त उभयोः॥ प्रजापते रोहिणीह० स्व॥ प्रोक्षणे॥ देव० मग्नये प्रजापतये रोहिण्यो जनुमस्ये वो० क्षा
मि॥ इत्यादि अधश्चरु स्थंते॥ यथाभागमित्यादि॥ प्रथम राशौ॥ इदमग्नये॥ इदं प्रजापतये रोहिण्या जनुमत्यै वो॥ ८
इति द्वितीये॥ इत्यादि कपालोपधाने॥ आग्नेयस्य स्थत्युपधायत नः स्थाल्यां इदं संस्वापरिभयोः॥ अधिश्रयणे॥

आग्नेयं पिंडमधिश्रित्य। यथाभागं ० थां। इतिचरुव्या विभज्य। इदं प्रजापतये रोहिण्यै। इदमनुमत्यै। इति निर्दिश्य घृ
तैश्च इति तंडुलान् स्थाल्यां रावपति। प्रथनादि नचरौ। अविदहंत इत्यादि सर्वेषां मंत्रेण। पिधाय यां। तेजसा प्रजा
पतये रोहिण्यै जुष्टं ० भि। तूष्णीमासादने। यज्ञास्त्व ० यंता ० अयं यज्ञ इत्यादि॥ प्रधाने॥ आग्नेयेनेष्ट्वा। मध्यमदे
वताउपांशुप्रचारः। मेक्षणेनावदानं। ईकारांतः स्त्रीलिंगशब्दः। उपांशु। प्रजापतये रोहिण्यै अनुब्रूहि स्रुचेः। प्र
जापतिं रोहिणीं यज स्रुचेः। प्रजापतये रोहिण्या इदं। प्रजापते रोहिण्या अहं ० आदो। अनुमत्यादि पूर्ववत्।
प्रजापतये स्वाहा १ रोहिण्यै स्वाहा २ रोचमानायै स्वाहा ३ प्रजाभ्यः स्वाहा ४ इति चत्वार उपहोमाः। स्विष्टकृति
मेक्षण प्रहरणादि। सर्वेषां पिरुज्य प्राशित्रं। सर्वेषां चतुर्धाकरणं। दक्षिणादि। न हविःशेषः। आब्राह्मण तर्पणां
तं समानं॥ ॥अथ होत्रं॥ आवाहने। अग्निम ० सोम ० अग्निमा ० उ ० प्रजापतिं रोहिणीं आवह स्रुचेः। अ
नुमत्यादि। आवाहनवदुत्तमप्रयाजः। प्रधाने। आग्नेयेन प्रचर्य। उपां ० प्रजापते रो ० नु। सानो ० वीरा ० ऊं
इ स्रुचेः। ये ३ ० उ ० प्रजापतिं रोहिणीं भू ० वो रोहिणी ० मानाः। प्रजापतिं ह ० यशां २ वौ ० उच्चैः। अनुमत्या
दि। प्रजापते रोहिण्याः प्रि ० उ ० प्रजापती रोहिणी। इदं हविः उ ० अनुयाजादि वृधन्व ० च्चैः मतोऽप्यासः
उ ० अवृत। अनुमत्यादि समानं॥ ॥ संतिष्ठते रोहिणी नक्षत्रेष्टिः॥ ॥अथाभ्यो भूते मृगशीर्ष नक्षत्रे

नक्षत्र मृगशीर्षनक्षत्रेष्टिः। श्री० थं सोमेन सह मृगशीर्षनक्षत्रेष्टायस्यै। समानं नाम ध्यज आधिपत्यमवाप्नवानु इति सव
९ संकल्पः। मृगशीर्षशब्द अकारांत नपुंसकलिंगः। समाप्ते० पौर्णमासं संभं। सोमाय मृगशीर्षाय श्यामाकः प
सिचरुः। अग्नीषोमीयविकारः पात्रप्रयोगे। स्थाली द्वयमेक्षणे। प्रणीता द्वयं। अन्या निपूर्ववत्। प्रणीता
प्रणयनकाले। स्त्रायवां। प्रणीताद्वयमादाय। धानस्य स्थोसीत्यादि आवृत्तिः। को वा गृ० यः। कस्त्वा यु० स
स्त्वागम्हानु० पत्वा। अनया वो० अन० त्वा० व्या। देवो यः० देव० स्वास० भिः। आपो० पयो देवा भ्रयशेष्यम
इमं य० घो हित्वा मि० सभिंद्रम शृणीथा र० मसि। ब्रह्मनप्ययो सि प्रे० ब्रह्मा प्रकृतिवत्। को वः प्र० सीः। कस्त्वा
प्रणाय० पयो देवं ग० इमं द० द्य न ष्ट म्रु० न्यं चत्। ब्रह्मप्र० ब्रह्मपूतमसि० ये। भू० रं पूर्दरामं विराडयद्दि०
नर्तनं नो देवं० प्रजानन्। ब्रह्मपू० पे। कस्त्वा०। निर्वापकाले। नानाबीजधर्मः। शाकटैकदेशे विभज्यवीहीं
नूपामा कार्या पृथक् निधाय। धूरसि० सं देवा० विष्णु० अकृत० मित्रस्य वां० भेद्यं० जाथां मायाद्र हिभूसि
पाउरूणी० मित्रं० उजेंध त्वेत्याशिः। पयो० सकृत्। अपहतमिति तत्र णान्येकीकृत्य लवेण निरस्येत्। इद
प्राहे तादि समानं। आग्नेयं पूर्ववन्निरूप्य। देव० सोमाय मृगशीर्षाय जु० मि। श्यामाकान्निर्वपति। अनुम ९
स्तादिहपूर्ववत्। इमे देवानामित्यादि। इमे उ० वां मा० उर्वं० तं। वा जुप० मि। अग्ने० सोम मृगशीर्ष इह० प्रनु०

नक्षत्र प्रधाने। सोमो रा० गं छि० धाम। आप्या० श्रुरे० सों ३। पे ३। हे सोमं मृगशीर्षं भूर्भुवः सुवर्यजेन० स्ति पि० णं। नसे०
१० मर्धा० प्पद्रा ३ ॥ वो० ॥ अनुमत्यादि। सोमस्य मृगशीर्षस्य। पि० सोमाय मृगशीर्षे इदं० अनुमत्यादि॥ ॥ संतिष्ठते मृग
शीर्षनक्षत्रेष्टिः॥ ३॥ श्वोभूते आर्द्रानक्षत्रेष्टिः॥ ॥ श्री० र्थं रुद्रेण सह आर्द्रानक्षत्रेष्ट्या यक्ष्ये। पशुमान्स्यामिति
संकल्प्य। ममाग्न इत्यादि पौर्णमासतंत्रं। रौद्रः प्रियंगु चरुराग्नेय विकारः। प्रियंगवः। राळे इति महाराष्ट्रभा
षया प्रसिद्धाः। कंगु इति चापरपर्यायशब्दः। हविष्यपदार्थे संगृह्णंति। देव० रुद्राय आर्द्रायै जु० प्रियंगून् निर्वपामि। रु
द्रायाद्रे सर्वत्रोदकस्पर्शः। मृगशीवन्नानाबीज धर्माः। पयःश्रपणी मा द्विपयसि श्रपणं च। रुद्रा र्द्रे हव्यं र० देव० स
न्नये रुद्रायार्द्रायायनुमत्यै वो० स्तानि। ततुं चर्मिता द्विपग वहनना दिप्रा गाधिवपना च रुपुरोडाशीय वि
भागः। इदमग्नये च। इदं रुद्राय आर्द्रायै चानुमत्यै च। पुरोडाशीयान्पिनष्टि। आग्नेयानंतरं। पयः सहितां गेद्रस्था
ली। संवापा पृभयोः उद्वासने। आप्या० सा रुद्राया द्रायै जु ष्टम० मि। तूष्णीमभिघारणं। यज्ञास्थे० नीः। भ
यंपक्ष इत्यादि॥ प्रधाने। आग्नेयानंतरं। रुद्राया द्रायो अनुब्रू०। प्रेक्षणो नावदानं। रुद्रमा० द्रीयज। रुद्रायार्द्रा १०
या इदं। रुद्रस्याद्रीया अहमन्नादः। अनुमत्यादि। रुद्राय स्वाहा। आर्द्रायै स्वाहा। २। पिन्वमाना यै स्वाहा। ३। प
शुभ्यः स्वाहा। ४। इति चत्वार उपहोमाः। यथालिंगं त्यागाः। स्विष्टकृतादि। सर्वेषां चरु धर्मकरणं। रुद्रस्या

अथ स्त्रकायामित्यादि देव० श्यामाकमग्नयेनुमत्यै चरो० नि। सोमाय मृगशीर्षाय। शंपञ्चमित्यादि अवहननकाले प्र
थमे वीजे हविष्कृतमाह्वयति। आद्रिरसीति सकृत्। सकृदंते तुषोपवापः। तंडुलान्प्रक्षालनं। द्वितीयस्याग्नेस्तनू
रसीत्यादि। ब्राह्मणघातकाले श्यामाकानुपोघ्नंते। द्वितीयस्य तंडुलान्प्रक्षालनं तंत्रेण निनयनं। उभयोः फली
करणनिधानं। अग्नेःशावस्थानेयथा०र्था। इदमग्नये। इदमनुमत्यै। आग्नेयादिनष्टि। कपालोपधाने। अष्टौ कपा
लानि। ततः प्रणीतापयसहितां सोम्यस्थालीं। अनुमत्यै पूर्ववत्। संवापादि पूर्ववत्। तूष्णीं सोम्यस्थाल्याधा
रणं। आसीदिति स्थाल्यासादनं। यज्ञो० नी:। प्रजाप० सोम्यस्य। अयं यज्ञो विहव्यं चतुर्होता। प्रधाने। आग्नेयया
गः पूर्ववत्। सोमाय मृगशीर्षायानुब्रू३हि। मेक्षणेनावदानं। सोमं मृगशीर्षं यज। सोमाय मृगशीर्षायेदं। सो
मस्य मृगशीर्षस्याहं० वृत्रहाभू० अनुमतिः पूर्ववत्। सोमाय स्वाहा १ मृगशीर्षाय स्वाहा २ इन्वकाभ्यः स्वाहा ३ ओषध
यः सो० भ्रा०पाय स्वाहा ४ ७ राभिजित्यै स्वाहा ५ इति षडुपहोमाः। यम० सो० महि स्वाहा ७ त्वं ८ सोमक्र० चक्षाः स्वाहा ८ ७न
पादं ७ सु० सोमरचा० ९ सोमायेदं० सर्वत्र। स्विष्टकृदादि समानं। सोम्यस्य पृथग्यजमानभागः। उभयोश्च तु
र्धाकरणं। सौम्यस्य हविःशेषः। सोमस्य मृगशीर्षस्याहमु० षं। प्रणीताविमोककाले क्रमेणोभयोर्विमो
कः। पोषायवः। पोषायत्वा। यो वो० यस्त्वा यो० त्वायि० सद सि० समुद्रयः० समु० त्वाम० मः सां० ७। आर्ति०
यस्त्वासि स० ति। ब्राह्मणतर्पणांतं समानं। अथ होमं॥ सोमं मृगशीर्षमावह। स्वाहा सोमं मृगशीर्ष इत्यादि

श्री या अहमु०। पयः प्रणीतास्थाल्यां विमोकांतं समानं पूर्ववत्॥ ॥अथाहोमं। आग्निमा रु० रुद्रमार्द्रामा रु० अनु
मत्यादि प्रधाने॥ आर्द्रया रु० निर्ऋतिर्जे० या नो। नक्ष० ममा० प० रो० २। ये रुद्रमार्द्राभू० हेती० क्राद्री० नं॥ अनु०
भा पा० रातं २ यो०॥ अनुमत्यादि पूर्ववत्। येय० रने: प्रि० रुद्रस्यार्द्री पा: प्रि० नुमत्यादि आग्नि रि० रुद्र आर्द्र रुं०
अनुमत्यादि समानं॥ ॥सतिष्ठते रुद्रदेवता सहार्द्रा नक्षत्रेष्टिः॥ ४ ॥श्वोभूते पुनर्वसु नक्षत्रे पुनर्वसु नक्षत्रेष्टिः।
श्री० अदिति देवतया सह पुनर्वसू नक्षत्रेष्वायक्ष्ये। ओषधीभिर्वनस्पतिभिः प्रजया च पशुभिः प्रजा मे पेति संक
ल्पः॥ ममाग्ने० इत्यादि पौर्णमास तंत्रं। आदित्यश्चरु वाग्नेय विकारः। रोहिणाख्य वत्सर्वं। पाथा मा इने स्थाली
द्वयं मेक्षणे। आधानादि पुद्धरीना दशा पनुक्ते सत्यदित्याः आज्यप्रणामामनंति। मत्स्ये आज्य प्रणीतादि धर्मा
न्याय च इच्छांति॥ निर्वापे। देव० मादित्यै पुनर्वसुभ्यां जु० अदित्यै पुनर्वसू इह अ० २१० देव० मन्नयोदित्यै पुनर्वसु मदित्यै
वो जु० सा। ना इंधक्ष्मित्यादि० अ रुक्षाय स्थानो। यथा भा० ध्वं। इदमग्नये। इदमादित्यै पुनर्वसुभ्यामादित्यै च। ये प मनुम
षणादि स्थाली [illegible] मधिश्रित्य तप्त्वा स्य स्तुमयो:। संयापादि समानं। आदित्यै पुनर्वसुभ्या जु० तूष्णीमासा
रनं। पक्षा स्व० अग्नेयज्ञ इत्यादि प्रधाने॥ आदित्यै पुनर्वसुभ्याम नुब्रू २ हि। आदितिं पुनर्वसू यज। आदि
त्यै पुनर्वसुभ्यामिदं अदित्याः पुनर्वसवार० प्रजानिषायिप्रजया च पशुभिश्च। इति मन्त्र प्रम्नोत मनुम
न्त्र्य। अनुमत्यादि। आदित्यै स्वाहा। पुनर्वसुभ्यां स्वाहा। आभूत्यै स्वाहा। प्रजात्यै स्वाहा। इति चतस्र उपहो

नक्षत्रेष्टि० माः। पूर्ववत्स्थागाः। स्विष्टकृतिमेक्षणप्रहरणादि। आदित्यस्य उभागं ब्रह्मणे परिहृत्य सर्वे प्राश्नन्ति। तथा चतुर्धाक
११ रणभागांश्चेति। इडां नी ब्रह्मापि भक्षयेति॥ सर्वेषां चतुर्धीकरणं। न हविःशेषः। आदित्याः पुनर्वसोरहमु० स्था
लीविमोकांतं समानं॥ ॥अथ होत्रं। अदितिं पुनर्वसू० आ ३०। स्वाहा। दितिं पूनर्वसू इत्यादि। पुनर्नो० दुपु० शो।
पुनर्नो० वं पुनः पु० मो ३॥ ये ३० दितिं पुनर्वसू० रेवान० सोवि० धा। पुनर्व० तीभि० पाधा ३ वौ २०॥ आदित्याः पुन
र्वस्वोः प्रि० अनुमत्या इत्यादि। अदितिः पुनर्वसू इदं ह० त। आह्लवानर्पणान्वा संतिष्ठते पुनर्वसूपस्त्रेष्टिः॥ ॥अथ
ब्धो भूलेति तिष्यनक्षत्रेष्टिः॥ ॥अथ० बृहस्पतिर्देवता सलिष्यनक्षत्रेष्ट्या यक्ष्ये ब्रह्मवर्चस्यामिति संकल्पः। तिष्य
राध्वः नक्षत्रवाची अकारांतः पुल्लिंगः। सभाम इत्यादि पौर्णमासं तंत्रं। बार्हस्पत्यो नैवारः पयसि चरुराग्नेयविका
रः। नीवाराः। आरण्यव्रीहयः। पात्रासादने स्थालीद्वयं मेक्षणे। निर्वापे। नानाबीजधर्मः। आग्नेयांते। देव० बृहस्पत
ये तिष्याय जुष्टं पात्रांतरे नीवारान्निर्वपति। अनुमत्यादि। बृहस्पतेतिष्य ह०। अरुन्धत्यामित्यादि। दे० मन्त्रयेष्ट
हस्पतये तिष्याय जुष्टमत्येवाजु० मि। आज्यनक्षत्रवहननादि नानाबीजधर्मः। उद्वासनांते। यथा० धा० इत्यादि ११
स्थालीद्वयामधिश्रित्य। पयसि बार्हस्पत्यं श्रपयित्वाभिघारयेत्। आज्या० सा बृहस्पतये तिष्याय जु० मि। तूष्णी
मासादनं। यज्ञोस्तु इत्यादि। बृहस्पतये तिष्यायानुब्रूहि। बृहस्पतिं तिष्यं यज। बृहस्पतये तिष्यायेदं० बृहस्पतेस्ति
प्स्वाहं० भात्से०। बृहस्पतये स्वाहा १ तिष्याय० २ ब्रह्मवर्चसाय० ३ आ तेधसं० सपेम स्वाहा। सहिष्णु० रिषः स्वाहा १

बृहस्पतय इदं। इत्युपहोमाः॥ स्विष्टकृदादि सर्वेषां चतुर्थीकरणं। नहविःशेषः। बृहस्पते स्विष्टस्याह मु०। पयःप्र
पीतास्थालीविमोकांतं समानं॥ ॥अथ होत्रं॥ बृहस्पतिं तिष्यमा ३. अनुमत्यादि। स्वाहा। बृहस्पतिं तिष्यं स्वाहा
नुमत्यादि। बृहस्पतिः प्र० नक्षि० व। श्रेष्ठो० ब्रुर्दि० स्तो ३। ये ३० बृहस्पतिं तिष्यं भू० वस्तिष्यः पु० नो बृ० आतु। बो
थे० ता॥ सुवी० मा ३ यो ३०॥ अनुमत्यादि। ये ३० मिः स्वि० भू० बृहस्पते स्तिष्यस्य प्रि० अनुमत्यादि। अग्निरि० बृह
स्पतिस्तिष्य ३० अनुमतिरित्यादि। संतिष्ठते तिष्यनक्षत्रेष्टिः॥ ॥श्वोभूते आश्रेषानक्षत्रे आश्रेषानक्षत्रेष्टिः॥॥
श्री० सर्पदेवताभिः सह आश्रेषानक्षत्रेष्ट्या यक्ष्ये। हेतुरूपभ्रातृव्यापनयनार्था। इति संकल्पः। अग्ना ग्न इत्यादि।
आमावास्यतंत्रं। सर्पशब्दः अकारांतः पुल्लिंगः। अत्र तु बहुवचनांतः पुल्लिंगः। आश्रेषा शब्द आकारांतो बहुवचनां
प्रतं तः स्त्रीलिंगः। ऐंद्राग्नविकारः। वेदो वेदिः। पात्रप्रयोगकाले। कपालैः सह धानाभर्जनार्थं महत्कपालं द्वारा सर्वं वा
भर्जनमेकस्मिन्। करंभसंयवनार्थं पात्रांतरं येति। अन्यानि प्रकृतिवत्। निर्वापकाले। नानाबीजधर्मः। बोधायन
मते सर्वेषां यवा भवंतीति पक्षे। न नानाबीजधर्मः। तस्मिन्पक्षे। आग्नेयादिद्रव्याणामपि यवानेव निर्वपेत्। न
स्मिन्पक्षे। न स्मिन्सीदेति मंत्रलोपः। इदं० भ्यां स सर्पेभ्य आश्रेषाभ्यो जु० मि। तथैवानुमत्यै चरुं यवानिरुप्य। सर्पा आ
आश्रेषा इ०धं। अनुमत्यादि। अश्रूका यामिति। नानाबीजपक्षे प्रोक्षणी। एवं० मग्नये नुमत्यै वा जु० मि सर्पे
भ्य आश्रेषाभ्यः। शुंधध्वमित्यादि। प्रोक्षणीरूपेण यवा संयुत्याव हंति। नानाबीजपक्षे। ब्रीह्यवघातकाले यवा १२

न॰प्र॰ नुप्तो घृतं ते। अ॰ आपस्तंबे। यथा॰ ध्वं। इति विवेके नराशी हृदयं कृत्वा। इदमग्नये। इति प्रथमराशौ। इदं सर्वेभ्य आ
१२ श्रेषाभ्यश्चानुमत्यै च। आग्नेयं पिनष्टि। कपालोपधानकाले। आपेपस्या ष्टाकुपधाय। तदुत्तरे। ध्रुव॰ह। इ
तिगार्हपत्ये धानाभर्जनार्थं महत्कपालमुपधाय। ततः ध्रुवासीति स्थालीमुपधाय। भृगूणामित्यादि तप्य
स्वेति रुद्राय एककपालयोः। निर्दिष्टधामिति केचित्। ततः यथा॰ नैथां। इति यवतंडुला विभज्य। इदं सर्वेभ्य
आश्रेषाभ्य। इदमनुमत्यै। इति पृथङ्निर्दिश्य। ततः सर्वेषां संवापादि पृथक् कृत्वा हर्यो स्थले ष्टसवनं कृत्वा।
ततः समापहत्यादि पिष्टानां कृत्वा। घर्मोसीति। आग्नेयं पिंडं कपालेष्वधिश्रयति। घर्मोस्ति वि॰ष। इति यवतं
डुला भर्जनकपाले ओप्य। ततः तथैव घर्मास्त्वेति स्थाल्यां तंडुलानोप्य। पुरोडाशस्य प्रथनादि कृत्वा नधानाश्च
वीः। रेवत्येव स्यादि। अग्निस्त इति सर्वेषां। अधिद॰ त। भर्जनादिना कृष्णिकुशलः शुक्लकृष्णादिरूपेण षष्ठ कुर्या
धानाः करोति। अनुपदस्यमानाः परिशेरते। इदमहमित्यादि पुरोडाशस्य। सूर्यज्योतिषा॰ भानम॰ य। इति
धानानां। सूय॰ थ। चरोः स्थाने तरुत्यादि कृत्वा। मंत्रेण पुरोडाशं। तूष्णीं धानाः। मंत्रेण चरुमभिघार्य पु १२
रोडाशमुद्वास्य। आज्ञा प्रथस्नेवा॰ श्रः। स्तताउद्वास्या तिअनिश्चो॰ नां। इति धानोद्वासस्य। लोपादित्यापव
मयत्वात्। न तास्मिन्सादेति मंत्रः। पात्रांतरउद्वासनपक्षे मंत्रलोपः। यथम प पुरोडाशोपलेपि मंत्रलोपः। त
तः इत॰ नां। कपालान्यभिघार्योद्वास्य। पात्रांतरउद्वासनपक्षे धानाभर्जनकपालमप्यभिघार्योद्वास्य। य

स्थागलंकरणात्तस्तस्तापूर्वोस्तते कृष्णाजिनेतरभावे पुनर्वास्तस्य धाजिरसी सादिधर्मेवास्तते कृष्णाजिने
धिवपनादिधर्मेणोधानाः पिनष्टि। देवस्य त्वेत्यादि पिष्टानि प्रस्कंदयतीसंतं। सस्कन्ने त्वा पूर्वोपकृष्टेउपस्तृतेषा
ग्नेतिरः पवित्रमायमानीय। तस्मिन्संस्नेतोप्य। जनयत्यै त्वा संयौमि। इति संयवनमंत्रेण संयौति स करंभो भवति। ओग
पुनरधिश्रयणं केचिदिच्छंति। तत्पक्षे पुनस्तूष्णीमभिधायौद्धे सुरनस्य पात्रेण सरुद्धास्य। देवस्त्वेति सर्वी क्रमेणा
लंकृत्य। प्रिये० सीदं त्वितिमासादनं। यतो स्त० नीः। यो नः० अपतं सर्पा आश्लेषा भु० दं०। अयं सहतः पंच होमा। प्रधाने।
आग्नेयेन प्रचर्य ध्रुवामुपस्तीर्य स्तादिमाभेरिस्म विकृत। मेक्षणेन हस्तेन वा वराय। सर्पेभ्य० आश्लेषाभ्यो उश्रू२ हि। अ
पदानानि प्रस्सवहानादि चरुयत्। सर्पानाश्लेषायज। सर्पेभ्य आश्लेषाभ्य इदं। सर्पाणामाश्लेषाणां म० द्विपाद्यन्तादे०
अनुमत्यादि। सर्पेभ्यः स्वा०। आश्लेषाभ्यः० इदं हस्केभ्यः स्वा० ३ इति तिस्र उपहोमाः। स्विष्टकृतादि। करंभस्य नेचतुर्धा करण
तस्य हविःशेषः। सर्पाणामाश्लेषाणाम० पं। कपालोद्वासने। यत्र नरति धानाभर्जनकपालमुद्वासनं। अन्यसंनानं॥ अथ
होत्रं॥ सर्पानाश्लेषा आ २० स्वाहा सर्पानाश्लेषा इत्यादि। इदं० स० इमा० तः। ये० तिते० षो ३॥ ये २० सर्पानाश्लेषा भू० मे
रोचने सूर्यस्य० सर्पा ये० ति। येषा० मं ते० मी ३०। अनुमत्यादि। सर्पाणामाश्लेषाणामि० अनुमत्यादि सर्पा० आश्लेषा इ० पं० धंत०
कृत। अनुमतिरित्यादि॥ ॥सतिश्च तत्र आश्लेषानक्षत्रेष्टिः॥ ॥अथो भूनेमघायामघानक्षत्रेष्टिः॥ ॥श्री० पितृभिः सहमघा
नक्षत्रेष्ठायक्ष्मे। पितृलोककर्म भुयामितिसकल्पः। पितृलोकस्य भूयासमिति सिद्धिं ... वचनः मघाख्यः आकाशे सस्वी १३
लिंगः। प्रमाणे० आमावास्यातंत्रं। पैत्रः षट्कपालः पुरोडाशः। ऐंद्राग्नविकारः। मतं पैत्रो वेदिः। पात्रप्रयोग का सेचलुई

नक्षत्र शः कपालानि स्थालीं च। बोधायनमते। पैतृयज्ञेन निर्वपण प्रोक्षणाधिवपन संवपनानि व्याख्यातानि भवन्तीत्युक्तत्वा

११ त्।तमसस्तेत्र योगः।निर्वापादि सिद्धस्य यं तंत्र प्रधानकालेवा कटादि भिन्नसमा विहारं सर्वतः परिश्रित्योत्तरतो द्वार

कृत्वा पथिन्न करणादि सर्वं यव पक्षे प्रयोगः। आग्नेयं निरूप्यादेव० पितृभ्यो मघाभ्योजु० नक्षत्रेण सह निर्वापः। अ

नुमत्यादि समानं। प्रधानदेवतार्थे निर्वापपक्षेना नावाऽधर्मः। उत्तरतो यज्ञोपवीती तिष्ठन्नाउपवीत्येव निर्वापः

सत्यपक्षे प्रयोगः।। अग्ने हू० पितरो मघा हव्यं रक्षस्व। अनुमते इत्यादि। प्रासने। देव० मन्नये नु मत्यै वो जु० भि

पितृभ्यो मघाभ्यः। शुंधध्व मित्यादि। प्रोक्षणी शेषेण यवानाद्र्ं कृत्वा वहनमादि कुर्यात्।। अः। शाव स्थाने मधिवेके

नरा श्रिद्वयं कृत्वा। स्थूलं राशौ। इदमग्नये चपितृभ्यो मघाभ्यश्च। इदमनुमत्यै च। पुरोडाशौ यान्यिन क्षि। कपालो

पधाने आग्नेयस्याष्टौ वुपधाय। गार्हपत्यं स्य दक्षिणा धनिक्षत्रं देवतायाः। आदितः षडुर्मत्रैः ऐंद्राग्नवन्म हृत्ताः

र्धार्धं इत्यंते तयं कपालानि। ध्रुवासीति चरुस्थाली। भृगूणामित्यादि समानं।। उद्वासने। पद्कपाल स्य तूष्णीम

भिघारणं। मंत्रेण तयोः पुरोडाशयोस्तूष्णीं पात्र्यां प्रतिष्ठापनं। यवमयत्वात्। नमसि सीदेति मंत्रः। आसीद

तिसासादनं। यज्ञो स्त०तीः। इत्याग्नेयो। योनः कू० अप तपितरो मघा भुवनानु दत्ता० अयं यज्ञः पंच होता। प्र २२

धानकाले यज्ञोपवीत्येव पूर्ववदाग्नेयेन प्रचर्य। नक्षत्रदेवतायाः सयनीयकेन सोमेन प्रचरणात्कर्मोव्या०

ख्यातः। इत्युक्तत्वात्। आग्नेययागार्थं गनस्तत्रैवापनिधाय। सर्वं प्राचीनावीती कृत्वा। अ० भुः जुह्वामुपस्ती

र्थस्वादि। माने० हस्तेन पूर्वमवदानमवद्यति। मेक्षणेनोत्तरं। पितृभ्यो मघाभ्यो नु०। हविरभिघार्य स्वादि। उरस्तु·ति
क्रम्येत्यादि दक्षिणामुखवल्लिखन् आश्रावणादि। पितृभ्यो मघायज। वषट्कृते दक्षिणार्धे जुहोति। सामपार्श्वेन। पि
तृभ्यो मघाभ्य इदं०। पितॄणां मघानामहं दे० द्रियाध्यक्षाहो० अपउ०। यज्ञोपवीत्येवानुमतेन प्रचर्य। पितृभ्यः स्वा
हा। मघाभ्यः स्वा०२ अनघाभ्यः स्वा०३ अनघाभ्यः स्वा०४ अरुंधतीभ्यः स्वा०५ इति पंचोपहोमाः। स्विष्टकृत्कालेपू
र्ववदवदानादि। नक्षत्रदेवतायाम् चतुर्थीकरणं। तस्य हविःशेषः। पितॄणां मघानाम०। वं। अपउ०। अनुमत्या
दिस्थालीविमोकांतं॥ ॥अथहोमः॥ ओ अग्निमा २०। पितृभ्यो मघाओ १०। अनुमत्यादि। स्वाहा पितृभ्यो मघाभ्यः स्वाहानु
मत्यादि। प्राची·ती। उपहू० सुम० स्वाः। तेनो० श्वाः स्व० लों २। ये २०। पितृभ्यो मघाभ्य० वयं अ०। धायमुं० यंति। थां०
विमम० पितां२ वो २०। ये २०। अग्निः स्वि० रग्नेः प्रि० पितॄणां मघानां प्रि० उनुमत्यादि। अन्नमुख्यदेवताकाले प्राची
नावीती केचन आमनंति। अग्निरिदं० त। पितरो मघा इदं इहविर० षं० धंतमहो० क्ष०। अप० १य। अनुमतिर
त्यादि॥ ॥संतिष्ठते मघानक्षत्रेष्टिः॥८॥ श्वोभूते पूर्वाफल्गुन्यां पूर्वाफल्गुनीनक्षत्रेष्टिः॥ श्री० र्थं पूर्वाफल्गु
नीम[illegible]यक्ष्ये। प्रथमान्या मितिसंकल्पः। अर्यमन्शब्दो नांतः पुल्लिंगः। स च सूर्यवाचकः। असौ
या आदित्योर्यमेति काम्यकांडश्रवणात्। फल्गुनीशब्द ईकारांतः स्त्रीलिंगो द्विवचनः। समासान्तरूपादि
पौर्णमासे मंत्रे। अर्यम्णश्चरुराग्नेयादिकारः। शेषं हविःस्विष्टकृत्स्मः। निर्वापे। अग्निः पूर्ववत्। देव० मर्य

म्णो फल्गुनीभ्यां जु० मि। अनुमत्या दि। अर्यमन्नू फल्गुन्योर्हू० त्व। अर्यमन्नू फल्गुनीइति षा। मोक्षणे। दे० मम येर्य
१४ म्णो फल्गुनीभ्यामदित्यै वो जु० क्षा मि। शुंधध्वमित्यादि। अंः शावस्थांते। यथा० ध्वं। इदमग्नये च। इदमर्यम्णो फल्गुनी
भ्यां चानुमत्यै च। पुरोडाशीयान्निर्वपि। अष्टाकपालांते। स्थाली द्वयमुपधाय। संवापाद्युभयोः। मंत्रेणाभिघा
रणं। आ था० सार्यम्णो फल्गुनीभ्यां जु० मि। अनुमत्या दि। सूत्था मासादनं। यज्ञा स्थ० तोः। अयं यज्ञ इत्यादि।
प्रधाने। अग्निः प्रकृतिवत्। अर्यम्णो फल्गुनीमनु०। अर्यमणं फल्गुन्यो यज॥ अर्यमणं फल्गुनीयजेति वा॥
अर्यम्णो फल्गुनीभ्यामिदं। अर्यम्णः फल्गुन्योरहं० स्वर्गं लोकं पुषेयं। इज्मस्य स्थाप्यानमनुमंत्रणं। अनुम
त्यादि। अर्यम्णे स्वाहा १ फल्गुनीभ्यां स्वा० २ पशुभ्यः स्वा० ३ इति तिस्र उपहोमाः। स्विष्टकृदादि सर्वेषां चतुर्धा
करणं। न हविःशेषः। अर्म्णः फल्गुन्योरहमु० षं। अनुमत्यादि स्थालीक्रियो कांतं॥ ॥ अथ होत्रं॥ ॥ अर्यम्णा
णं फल्गुन्यो वा ३०। स्वाहार्यमणं फल्गुनी स्वाहानुमतिमित्यादि। प्रधाने॥ गवांप० तं न० रु॥ तेनः० नां जो० मां २
ये ३० अर्यमणं फल्गुन्योर्भू० वर्यनेमा० जितायस्य० चेतः। अर्यमा० पान्फल्गु० वीती३ वौ ३०॥ अनुमत्यादि॥
अर्यम्णः फल्गुन्योः प्रि० अर्यमा फल्गुन्या। इदं० न। अनुमतिरित्यादि॥ ॥ संतिष्ठते पूर्वाफल्गुनीनक्ष
त्रेष्टिः॥ १॥ श्वोभूत उत्तराफल्गुन्यामुत्तराफल्गुनीनक्षत्रेष्टिः॥ ॥ श्री० थं उत्तराफल्गुनीनक्षत्रेष्ट्या य १४
क्ष्ये॥ भगो हवै श्रेष्ठो समानानां स्यामिति संकल्पः॥ भग शब्दः ईश्वरवाचकः। ऐश्वर्यस्य समयस्य धर्म

स्य यशसः श्रियः। वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा। उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं॥ वेत्ति विद्याम
विद्यां च स वाच्यो भगवानिति॥ इति शास्त्रांतरेस्मरणाच्च॥ मासा ग्र इत्यादि। पौर्णमासं तंत्रं। भगश्च रुद्रा अग्ने यमिका
र॥ रोहिणी नक्षत्रे शिवस्य ह्रदस्यः। देव० भगाय फल्गुनीभ्यां जुष्टं नि० भग फल्गुन्योर्ह० स्व। देव० मग्न ये भगाय फल्गुन्या
वनुमत्यै वा० शामि। शुंध ध्वमित्यादि। अन्वाधानं तं। यथा०ध्वं। इदम मयेच। इदं भगाय फल्गुनीभ्यां चानु
मत्यै च। पुरोडाशीयानि न स्त्रि स्थालीद्वयमुपधाय। उभयोः संवपनादि। आप्या० भगाय फल्गुनीभ्यां जु० मि
मंत्रेणाभिधारयां। तूष्णीमासादनं। यत्नास्य० नीः। अयं यज्ञ इत्यादि। प्रधाने। अग्ने रनंतरं। भगाय फल्गुनी
भ्यामनु० भग फल्गुन्योयज। भग फल्गुनी इतिवा। भगाय फल्गुनीभ्यामिदं। भगस्य फल्गुन्योर० न्मा दो०
अनुमत्यादि। भगायस्वा० १ फल्गुनीभ्यां स्वा० २ श्रेष्ठाय स्वा० ३ इतित्रय उपहोमाः॥ भगस्य भग० म॥ सं
त्वा० वेह स्वाहा ४ भगप्र० स्याम स्वाहा ५ भगायेदं। स्विष्टकृदादि सर्वेषां चतुर्धाकरणं। नहवि:शेषः। भगस्य
फल्गुन्योरहमु० षं। स्थालीपाको तं समानं॥ ॥अथ होमः॥ भग फल्गुन्या वा ३०। अनुमतिमित्यादि। स्वाहा
भग फल्गुनी इतिवा॥ प्रधाने॥ ॥श्रेष्ठो० सिस० नाम॥ अस्मे० यंगो० दे हो ३॥ ये ३२ भग फल्गुन्योभू० भगो ह०
त्वा भगं ०वेश। भगस्ये० मय०दमा ३ यो ३०॥ ये ३० हा अग्ने २। सि० भू० रग्नेः। प्र० भगस्य फल्गुन्योः। प्र० अनुमत्या
इत्यादि। अग्निरिदं० भगः फल्गुन्याय० त। अनुमतिरित्यादि। सति चोत्तरा फल्गुनी नक्षत्रे हिः॥ ॥

नक्षत्रेष्टि॰ श्रीभूते हस्तनक्षत्रे हस्तनक्षत्रेष्टिः ।। ।। श्री॰ अथ हस्तनक्षत्रेष्ट्या यक्ष्ये । मनुष्याणां श्रद्धानः सवितासमानानां
१५ स्यामिति संकल्पः । ममायमित्यादि । पौर्णमासं तंत्रं । सावित्रो द्वादशकपालः पुरोडाशः । आग्नेयस्थानीकारः । आशु
व्रीहयः हविर्द्रव्यं । अल्पकालपक्वाः । नेवांपष्टि दिनपाकसाध्यत्वात् षष्टिका इत्यामनंति । कात्यायनस्तु । लूनाः पुनः
प्ररूढाः पक्वा इति । कृत्तिकेष्टिवत्कल्पः । पात्रासादने । विंशतिकपालानि समेस्य पंचस्थाली च । अन्या निरूप्ते वत्
निर्वापे । अग्नेरनंतरं । देव॰ भ्यां सवित्रे हस्ताय जु॰ मि । सवितृशब्दस्यकारांतः पुल्लिंगः । हस्तशब्दः अकारांतः
पुल्लिंगः । अनुमत्यादि समानं । सर्वत्र आशुव्रीहयएव ग्राह्याः । प्रजापतिः सवित्रे त्युपांशु । इति सूत्रभाष्यात् । सवि
तुरूपांशुत्वं । सवितर्हव्यं २० स्वा । देव॰ मग्नये सावित्रे हस्ताय अनुमत्यै वो जु॰ मि । क्रमेण प्रोक्षणं । शुंधध्वमित्यादि अः
शवस्थाने यथा॰ धं । इदमग्नये च सावित्रे हस्ताय च । इदमनुमत्यै च । पुरोडाशीया स्थपाहि । कपालोपधाने आ
ग्नेयं तेसवितुर्द्वादशकपालानि । आग्नेयं च संचक्षुस्त्वमिदसि । ततः स्थाली । संवपनादुभयोः । आप्या॰ सवि
त्रेजु॰ मिघा॰ । अनुमत्यादि समानं । तूष्णीमासादनं । प्रधाने ।। अग्निः प्रकृतिवत् । उपांशु । सवित्रे हस्ताय अनु
मत्यै स्वाहेः ३॰ । सविता २ः हस्तं यज्ञे स्तुतेः । सवित्रे हस्तायेदं । सवितुः इदमस्याहदे॰ नादो॰ । सावित्रेसोऽहा॰ १ हस्ता १५
य स्वाहा २ आददते स्वा॰ ३ आहृण्वते स्वा॰ ४ प्रयच्छते स्वा॰ ५ प्रतिगृह्णते स्वा॰ ६ अयानोदे॰ सुवस्वाहा । धिन्वा
नि दे॰ आसुवस्वाहा ८ इति षडुपहोमाः । यथालिंगं त्यागाः । स्विष्टकृदादि । सर्वेषां चसुधीकरणं । नहविः

नहविःशेषः।सवितुर्हस्तस्या०हमु०पं।स्थालीविमोकांतसमानं।अथहोत्रं।उपां०सवितारङ्हस्तआवहेत्युच्चैः सवि
तारङ्हस्त।स्वाहानुमत्यादि।।प्रधाने।।उपां०।आया०तुदे०तुहि०थेन।वह०संप्र०मह्य।ॐ३।इत्युच्चैः।ये३०सवि
तारङ्हस्तमू०वुहस्तः प्र०योद०नत।दाना०ययो०श्रा३वो३०उच्चैः।सवितुर्हस्तस्य प्रि०अनुमत्यादि।सविता
हस्त०न।उपांशुव्रतधर्मः।अनुमतिरित्यादि।संतिष्ठतेहस्तनक्षत्रेष्टिः।। ।।श्वोभूतेचित्रायांचित्रानक्षत्रेष्टिः।।
श्री०र्थंत्वष्टृदेवतयासहचित्रानक्षत्रेष्टामपक्ष्ये।चित्रंप्रजांविंदेय।इतिसंकल्पः।।ममात्रद्रव्याद्यौर्णमासंतंत्रं।
साष्टाकपालःपुरोडाशः।आग्नेयविकारः।त्वष्टृशब्दऋकारांतःपुल्लिंगः।चित्राशब्दष्टाबंतस्त्रीलिंगः।
एकवचनः।रू०चित्रेकेष्टिवत्कल्पः।पात्रासादने।षोडशकपालानि।समे स्तरणं स्थालीच।निर्वापेअग्निःपूर्ववत्
त।देव०त्वष्ट्रेचित्रायैजु०मि।अनुमत्यादि।त्वष्ट्रेश्चित्रेइ०स्त।प्रोक्षणे।दे०मग्नयेत्वष्ट्रेचित्रायाअनुमत्यैवो०
क्षामि।शुंधध्वमित्यादि।अ०शवत्कांतेयथा०ध्व।इदमग्नयेचत्वष्ट्रेचित्रायैच।इदमनुमत्यैच।पुरोडाशीया
न्पिनष्टि।कपालोपधाने।त्वष्टुराग्नेयवद्दशैककपालानि।स्थालीच।उभयोःसवापादि।अभिघारणे।आ
प्याय०सात्वष्ट्रेचित्रायैजु०पा०मि।तूष्णीमासादनं।यत्रास्थ०मंता४ श्रा०नीः।अयंयज्ञइत्यादि।प्रधाने
अग्निःपूर्ववत्।त्वष्ट्रेचित्रायाअनु०सपारंचित्रांमज्ञ।त्वष्ट्रेचित्रायाइदं।त्वष्टुश्चित्रापाअह०जादो०अ
नुमत्यादि।त्वष्ट्रेस्वाहा।चित्रायैस्वा०र्चैत्रायस्वा०३प्रजापतयेस्वाहा।४इतिचत्वारउपहोमाः।स्विष्टकृदा

दिसर्वेषां वस्तुपाकरणं।न हविःशेषः।सकृत्छिन्नाया।अ०षं।स्त्रालाविमोकांतं समाने॥ अथ होत्रं॥ त्वष्टारं चित्रा
दिसर्वेषां वस्तुपाकरणं।न हविः शेषः।सकृच्छिन्नाया।अ०षं। ॥निवे० अवरू० विश्वं ३। मे ३। त्वष्टारं चित्रा
दि सर्वेषां वस्तुपाकरणं। न हविःशेषः। त्वष्टा न० चित्रां ३ सु० नां॥ निवे० अ० विश्वं ३। मे ३। त्वष्टारं चित्रां
३५ मा ३। स्वाहा त्वष्टारं चित्रां स्वाहा अनुमत्यादि॥ त्वष्टा न० चित्रां सु० नां। अनुमत्यादि। त्वष्टुः चित्रा याः प्र० अनुमत्या इत्यादि। त्व
भू० वसलं नस्त्व० त्तं० सा। तं नः प्र० नुमो० तां ३ वो ३। अनुमतिरित्यादि। संतिष्ठते चित्रा नक्षत्रे ष्टिः॥ ॥ भ्यो मूले स्वा सां स्वातीनक्षत्रे ष्टिः॥ ॥ मिष्ट्य
प्राचित्रे इष्टिः० अनुमतिरित्यादि। संतिष्ठते चित्रानक्षत्रे ष्टिः॥ मित्या मित्याम्नानात्। अस्याभिप्सा सां ना
तिचा स्वातीनक्षत्रस्य नामांतरमभिधीयते। वायुर्नक्षत्रमध्येति मित्या मित्याम्नानात्। वासनक्षत्र
ध्य विकारत्वा द्वहसाध्यता नियता॥ सांनाय्यवत्स्यात् द्व्यहकालाः। कृत्तिकाद्येष्टिषु विधानात्। सचोवाधा
ता सस्त त्वाचित्रेष्ट्यनंतरं स्वातीनक्षत्रेष्टिकर्तव्यता। बोधायनमते तु सद्य एव प्रयोगः। वस्तुतस्तु। सर्वेषां कर्मणामे
नपक्षेपि वत्सापाकरणं ग्रासवाहरणं पूर्वं कं तूष्णीं मंत्रेण वा पूर्वेद्युरेव कर्तव्यं सामर्थ्यात्। सर्वेषां कर्मणामे
नपक्षेपि वत्सापाकरणं प्रासवाहरणं दर्शवत् अमावास्यायां। पूर्वमपि गृहमेधीयवत्सापाकरणदर्शनाच्च॥ अथ छ
कफ़ शब्देन मध्ये व्यवधानेपि न दोषः। अन्वाधानं। पूर्ववत्। वायुदेवत्ये नक्षत्रे स्वायुष्ये। कामचार
हसाध्यप्रयोगः। चित्रेष्ट्यनंतरं तस्मिन्नेवाहनि॥ ॥ श्री० वायुर्देवेनु सहस्त्या तीपस्त्रे स्वायुष्ये। कामचार
हसाध्यप्रयोगः। चित्रेष्ट्यनंतरं तस्मिन्नेवाहनि॥ अन्वाधानं। तूष्णीमसिदमादाय। म्येवे साद्यिता ३५
मे पुलो के ग्रामजय्येयं। इति संकल्प अ०। ममाग्न इत्यादि। अन्वाधानं। तूष्णीमसिदमादाय। मत्र वत्सभावस्य
स्वाहरणं। नाग्नेयवत्सापाकरणं। सायं होमोत्तरं प्रातर्दोहाय वत्सापाकरणविधानात्। मत्र वत्सभावस्य
प्रतं। अभु या इत्या। दिपवश्याहास्वे तं। आसिद्धादाना। दिवेदो वेदिः। बर्हिरिध्मश्च। तत्तोमर्वेदिस्तारणायार

स्यादि।उपवेषं करोति।उपवेषो॰शायवे निष्टायेह्॰नः।शाखा पवित्रं च मंत्रेण कृत्वा।सायंसवाग्वा होमः॥
तदंते मंत्रेण तूष्णीं वा।वायुरस्यु पायुरसि इत्यूहितेन मंत्रेण गच्छेर्वत्सस्य सकृदेव वत्सापाकरणं।वायवे निष्टायेद्व
सेदुपंपयो निरवपत्।इत्येकवचनाभिधानात्।एकस्याएव गोर्वत्सापाकरणं।जात्यभिप्रायेण तु।अनेकगोष्ठेवत्
सापाकरणे तु मरुतिव प्रयोगः।पृथेकस्याएव गोष्ठे दोहपक्षानुसारेण प्रयोगः।सकृत्प्रसूतानां द्वित्थस्यादि इति शा॰
स्त्रांतरे दर्शनात्।होमो चरं परिस्तरणं।घत्सापाकरणं।अरण्याशनं।इति क्रमः।प्रातरपि यवाग्वा होम आमनंति।प्रा
मुह्यात्तंपयुक्रमः।पात्रासादने।एकामेव स्थालीं समेक्षणां कपालैः सहप्रयुज्य।प्रातर्दोहपात्राणि।उरवाः शाखापवि
त्रं अभिधानीनि दाने दोहनपात्रमुपवेषं च।अन्वानिग्रहणं।निर्वापे।संवरयोरेव निर्वापः।देव॰अग्नये जुष्टं वो जु
ष्टानि।शुंधध्वमित्यादि।अंशवरूढांते।यथा॰यां।इदमन्नये च।इदममुष्ये च।पेषणादि।कपालान्युपधाय।प्रातर्दो
हः।एषा चरति म॰प्रजापतीय॰रूपा।धरीभवन्स्यूपआयमाने हत्वा वायुर्निष्टारमयनुगोः।सामायतीमनीक्षेतो नि
कृदं॰ध्वं।मानं॰सि।भूमभूं॰साय॰विभृतो वायवे निष्टायेभ्यः।इति वा।भूर्युर्णा॰स्व।उपस्र॰ताव।वस्त्वां॰सह॰
स्वधारं।उरगयं शाखापवित्रमादधाति।आदिसे॰पूषासि॰विहारगो॰ष्ठा।अयस्यासोप्रजः॰भवति।उर्जे पूषः॰
जीवस्कपता॰य।द्योश्वे॰तु।उत्संदु॰तु।काम॰वायवे निष्टाये॰यं।गंगां।सावि॰देवस्या॰या।बेऊडंपि वा
पवे निष्टायै देवेभ्यो॰तां।कृत॰भ्यां।द्योश्वे॰तु।संपृच्यध्वं॰ये।संक्षालननिनयनांते।स्थाल्याधिश्रयणं।सं

नक्षत्र वापनाद्युभयोः। मंत्रेणाभिघारणमाग्नेयस्य। पस्त० मस्थं। प्रातर्दोहमभिघार्य। अनुमत्याभिघारणादि। आग्ने
१८ यमुद्वास्य। दं॰ह॰तू। इति प्रातर्दोहमभिमुद्वास्य। आर्द्रेभुवनस्येतिचरूद्वासनादि। अलंकरणादि सर्वेषां। आसी
दंतिस्यासादनं। दक्षिणस्याः श्रोण्यां श्टतमासाद्य। य॰नः। यस्तआत्मेतिसान्नाय्यमासाद्यमानमभिमंत्र्य। यज्ञो॰
ये॰ती। इति पुरोडाशं चरूक्रमेणाभिमृश्य। इदमि॰युतां। इतिप्रातर्दोहं। अयंयज्ञः पंचहोता॥ प्रधाने॥ आग्नेयेन
प्रचर्य पयसा प्रचरति। माभेरित्यादि स्रुवेणावघाने। क्षायवे निष्ट्वा योअ॰ वायुर्निष्ट्वां यज। वायवे निष्ट्वा इदं॰।
वायो निष्ट्वा यांअहं देव्ये इत्यादी भू॰ जेमानभिनिवा। वायवे स्वाहा २ निष्ट्वा ये॰ कामचाराय॰ अभिजित्यै॰
इति चत्वारउपहोमाः॥ सर्वेषां क्रमेण स्विष्टकृदादि। चरुपुरोडाशयोः स्विष्टकृदर्धीकरणं। सान्नाय्यस्य हविःशेषः
प्रस्तरेण सह प्रास्वा प्रहरणं। वायोर्निष्ट्वा याअ॰ वं। अनुमत्यादिस्त्वा॰ विमोकांतं। नसान्नाय्यकुंभी विमो
क॰। अथहोमं॥ अग्निर्मा ३॰ वायुर्निष्ट्वामा ३॰ अनुमत्यादि। स्वाहा वायुर्निष्ट्वां स्वाहानुमतिं॰॥ वायुर्नष्ट॰ नि
स्पाति॰ अः। समी॰ चापा॰ रातो ३। ये ३॰ वायुर्निष्ट्वा भू॰ वस्त। नो॰ नुतन्व॰ ह्रा। मनो॰ मे पथा॰ विश्वा ३ यो ३॰॥ अ
नुमत्यादि। वायोर्निष्ट्वा याः प्रि॰ अनुमत्यादि। वायुर्निष्ट्वेदं॰ ह॰त। अनुमतिरित्यादि॥ ॥ संतिष्ठतेस्वातीन
क्षत्रेष्टिः॥ १३॥ श्वोभूते विशाखायां विशाखानक्षत्रेष्टिः॥ श्री॰ एंद्राग्निभ्यां सह विशाखा नक्षत्रेभ्याय यक्ष्ये॥ १८
सम्भाना नाः श्रेष्ठ्यमभिजयेयमिति संकल्पः। ममाग्न इत्यादि। आमावास्यतंत्रं। अत्र यजमानस्य मतं। यदो

वेदिः। ऐंद्राग्न एकादशकपालः पुरोडाशः। प्रागुदयात्तं च प्रक्रमः। पात्रासादने। एकोनविंशतिकपालानि। समेक्षणं
स्थालीच। अन्यानि पूर्ववत्। निर्वापे॥ अग्निः पूर्ववत्। देव॰ मिंद्राग्निभ्यां विशाखाभ्यां जु॰ मि। विशाखाभ्याद् स्थालीछिं
ग आवंतो हविषः। अनुमत्यादि। इंद्राग्नी विशाखे हव्यं रक्षेथां। देव॰ मग्नयेनुमत्यै वो जु॰ क्षामींद्राग्निभ्यो विशा
भ्यां। अग्नेः शावस्थाने। यथा॰ ध्रुं। इदमग्नये चेंद्राग्निभ्यां विशाखाभ्यां च। इदमनुमत्यै च। पुरोडाशीया भिनष्टि। उपधा
ने। ऐंद्राग्नस्य पक्षे त्रिवदेकादशकपालानि। ततश्चरुस्थाली। ततउभयोः संवापादि। इदमहमित्यादि। तूष्णीमभि
